# दिवाकरद्युतिः



वेदमार्तण्डाचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः

Scanned with CamScanner

दिवाकरद्युतिः

(वेदमार्तण्ड-आचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)

प्रकाशिका –
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक,
वडोदरा, गुजरात. 390020
२०१६

ISBN :978-93-827 13-15-9

प्रतिलिपयः - ३००
प्रकाशनवर्षम् – २०१६
मूल्यम् – ५००
प्राप्तिस्थानम् – वेदनिकेतनम्, लुहागडजागा, शंकरानन्दमथलेन्
तिआडिसाहि, पुरी- ७५२००१ , ओडिशा
दूरभाषा- ०९४३७६९७५३०

मुद्रणम् – Pagemaker Computer Services
117, Bapuji Nagar, Bhubaneswar - 751009



Scanned with CamScanner

# दिवापि शिवतुष्ट्यै हि शिवरात्र्याः व्रतं कुरु

**डॉ.पंङ्कज एस.रावलः**

शिवतत्वविषये जगति एका भ्रान्ति एकं चाज्ञानं व्याप्तं विद्यते । केचन जनाः प्रायः शिवतत्वं, शिवार्चनम्,महाशिवरात्रिव्रतम् आदि रहस्येषु रहस्येभ्यश्चानभिज्ञास्सन्ति पाश्चात्यविदुषां कुतर्कपरम्परायां कुतर्कविचारधारायां प्रवाहिताश्च भवन्ति अस्मदीयापि। मायामयाः मुग्धाः विषयासक्ताः कुश्चितविचारैश्च मङ्गलमूर्तौ शिवे आरोपान् आक्षेपान् च प्रकुर्वन्ति । शिवस्य जीवनं-दृष्ट्वा-श्रुत्वा-पठित्वा धूर्जटिरूपेण व्याघ्राम्बरदिगम्बरत्वेन वा श्मशानक्रीडकत्वेन परिगणयन्ति तस्मादग्रे न किमपि विचारयन्ति । प्रायः वैष्णव-शाक्त-सौर-गाणपत्यादिसम्प्रदायविशेषेषु भ्रमः परिभ्रमति भूमौ परन्तु शैव पाशुपतादिमतेषु भ्रमः तेभ्योऽपि अधिकः परिभ्रमति भूमौ कारणं ते तु देवीदेवाः अपि तु अयं महादेवः अतः भ्रविंषयेऽपि अयं महादेवः पृष्ठेन न स्यात् । शिवः *अनार्योऽस्तिती* एकः मतः परिभ्रमति शैवः पाशुपतमतः नास्ति । अनार्यः इत्येवास्ति कथनाभिप्रेतमिति । शिवो शुद्धो वैदिकार्यधर्मपरम्परायामिति कथनास्याशयः । समयप्रवाहेणापि प्रायः नद्यः समुद्राभिमुखा : भवन्ति तथैव यथा महिम्ने स्तोत्रे **"नृणामेको गम्यस्त्वमसि पयसामर्णव इव"** बौद्ध- कालाद् शिवधर्मे प्रहाराणां प्रारम्भो जातः किन्तु तत्र अधिकमास्तु । यथा शैवमतेषु मतभेदाः तथैव शिवव्रतेषु शैवानुष्ठानेष्वपि मतभेदाः ।

अत्र महाशिवरात्रि व्रतविषयकं लिखितुं नास्ति लेखकरूपेण ममाधिकारः सामर्थ्यं प्रावीण्यं वा किन्तु शिवभक्तत्वेन लिखितुं शब्दपूजनं च कर्तुं अयमस्ति मम नम्रप्रयासः । महाशिवरात्रिव्रतस्यारम्भात् पूर्वं किञ्चित् पदविग्रहः आवश्यकः ततश्च प्रतिपदमागच्छामि । को शिवः ? का च रात्रिः ? किं च व्रतमिति ? शब्दत्रयाणां के अर्थाः ? शिवसाधनायै किं साधनं ? किं च तस्य फ़लमिति ? ज्ञातुमत्र आयासः क्रियते ।

**शिवः** कोऽयं शिवः ? अस्य प्रश्नस्योत्तरं शिवकृपया एव ज्ञातुं शक्नुयात् । शिवशब्दार्थज्ञानेन शिवसाक्षात्कारो भविष्यतीति ज्ञेयम् । **शेते तिष्ठति सर्वजगत् यस्मिन् सः शिवः शम्भुः विकाररहितः "** इति । श्यति पापम् –शो+वन्, पृषो स्वस्थःप्रसन्नः समृद्धः । सनातनधर्मे त्रिदेवेषु सृष्टेः संहारकः, वेदः, मोक्षः, सुरः, देवता इत्यादिबहवोऽर्थाः प्रोक्ताः शिवशब्दस्य ।

अर्थात् यस्मिन् सम्पूर्णं जगत् शेते स्वपिति यः विकाररहितोऽस्ति स शिवः । अथवा यः अमङ्गलस्य ह्रासं करोति यः सम्पूर्णं जगत् स्वस्मिन् स्थापयति लीनं च करोति करुणासागरः



Scanned with CamScanner

योऽस्ति नित्योऽस्ति, सत्योऽस्ति, सुन्दरोऽस्ति, जगदाधारोऽस्ति, स शिवः पुष्पदन्तेनापि स्वस्तोत्रे इत्थं प्रकटितोऽस्ति तद्यथा -

त्रयी साख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनाम् वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥

अयं शिवः जगति अखण्डपरतत्त्वरूपेण, व्याप्तः, सर्वव्यापकः, सर्वशक्तिमान, व्यक्तरूपेणसगुणेश्वरः, निर्गुणब्रह्म , परमात्मारूपेणापि अयमेव प्रथितः। जगदात्मा, शम्भुः, मयोभवः, शङ्करः, मयस्करः, शिवः, रुद्रः, चन्द्रचूडः, चन्द्रशेखरः, चन्द्रमौलिः, भूतानामधिपतिः इत्यादि नामभिः प्रथितः प्रसिद्धश्च विद्यते । आचार्येण पुष्पदन्तेन सम्यगेव प्रोक्तम् स्वस्तोत्रे यत् -

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह
स्त्वमा पस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ॥

अयं शिवः वर्णनातीतः महदेवः अनुभवानुभूतिगम्यश्च विद्यते । अयमेव कदाचित् आशुतोष : भवति अनेनैव समस्तानां विद्यानां कलानामाविर्भावेति परिगण्यते । अयमेव वेदानां प्रावस्य च शिवः उद्गमस्थानम् । वेदैः अस्मै नेति –नेति इति कथितम् । अयं शिवः एव नित्याश्रयी नित्यानन्तश्रयी दयासागरः करुणामूर्तिः करुणासागररूपेण विलसति । अतैव प्रसिद्धश्लोके जनैः स्वीकृते यत् "**कर्पूरगौरं करुणावतारमिति**"।

**रात्रिः** - रा दानार्थकधातुना रात्रि शब्दो निष्पन्नः या सुखादिकं प्रददाति सा रात्रिः । ऋग्वेदे रात्रिसूक्ते यूपमन्त्रे रात्र्याः प्रशंसा कृता विद्यते यथा–

**उप मा पेपिशत् तमः कृष्णं व्यक्तमस्थिता**
**उप ऋषेव यातय । (ऋग्वेद – 10 -27-7)**

रात्रिः आनन्ददायिनी भवति । सर्वेषां आश्रयदायित्वेन अस्याः स्तुतिः कृता विद्यते । शिवरात्रिः अर्थात् आनन्ददात्रिरात्रिः, यस्याः शिवस्य नाम्ना सह नित्यसम्बन्धोऽस्ति सा रात्रिः माघमासे, फाल्गुनमासे, कृष्णपक्षे चतुर्दश्यां शिवपूजायाः उपवासस्य जागरणस्य च एकं विशिष्टं महत्वं विद्यते । अतैव तदर्थं कानिचित् उदाहरणानि यथा -

**परात् परतरं नास्ति शिवरात्रिपरात् परम् ।**
**न पुजयामि भक्त्येशं रुद्रं त्रिभुवनेश्वरम्**
**जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः ॥(स्कन्धपुराणम्)**



Scanned with CamScanner

**सौरो वा वैष्णवो वान्यो देवतान्तरपूजकः ।**
**न पूजाफलमाप्नोति शिवरात्रिबहिर्मुख : ॥**
**(नृसिंहपरिचर्या / पद्मपुराणम्)**

शिवरात्रिव्रतं परात्परं विद्यते यः जीवः शिवरात्र्यां नार्चति न पूजयति सः सहस्त्रवर्षं यावत् परिभ्रमति । भवतु सः जीवः सूर्यभक्तः विष्णुभक्तो वा । शिवपुराणं तस्मादग्रे समर्थयति । यत् –

**शिवं तु पूजयित्वा यो जागर्ति च चतुर्दशीम् ।**
**मातु: पयोधररसं न पिबेत् स कदाचन ॥ (स्कन्दपुराणम्)**

शिवरात्र्यां चतुर्दश्यां यः जीवः शिवं पूजयित्वा जागरणं करोति स कदापि न पुनः मातुः स्तनपानं करोति नाम सः जीवः मुक्तिं भजते ।

**सागरो यदि शुष्येत क्षीयते हिमवानपि ।**
**मेरुमन्दरशैलाश्च श्रीशैलौ विन्ध्य एव च ।**
**चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतम् ॥ (स्कन्दपुराणम्)**

सागरः शुष्कतामेति, हिमालयः क्षयं प्राप्नोति,मन्दर-विध्यादिपर्वताः विचलिताः भविष्यन्ति किन्तु शिवव्रतं शिवपूजनकर्ता वा न कदापि विचलितो भविष्यति अर्थात् शिवव्रतं न कदापि निष्फलं गमिष्यत अवश्यं लभते तत्फलम् । माघकृष्ण चतुर्दश्यां व्रतस्य कः महिमा? किं फलं ? किं च माहात्म्यम् ? का विशेषता ? किं नामशिवरात्रिव्रतम् ? तदिदानीं प्रतिपाद्यते ।

व्रतेऽस्मिन् उपवासस्य, जागरणस्य शिवपूजायाश्च महिमा विवर्णितः कथितश्च विद्यते एतेषां तात्विकमर्थं ज्ञापयितुमत्र नम्रप्रयासः क्रियते । वैदिकसाहित्ये व्रतस्यार्थः वेदबोधितं कर्म, इष्टप्रापकं कर्म कथितम् । दार्शनिक काले अभ्युदयः निःश्रेयसं कर्म च प्रोक्तम् व्रताय ।अमरकोशे व्रतस्यार्थः कृतः नियमः । पुराणे व्रतशब्दः धर्मवाचकः । निष्कर्षत्वेन वेदबोधितं अग्निहोत्रादि कर्म शास्त्रविहितनियमानां पालनपूर्वकं साधारणधर्मः अर्थात् व्रतम् । येन कर्मणा भगवतः सान्निध्यं प्राप्यते तादृक् कर्म एव व्रतम् ।

**क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः । देवपूजाग्निहवनं संतोषः स्तेयवर्जनम् ।**
**सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्थितः ॥ (भविष्यपुराणम्)**

अर्थात् व्रतमेव समयानुसारं साधारणासाधारणधर्मस्य वाचकं भवति । इदानीमुपवासमर्थात् किं ? तज्ज्ञेयं विद्यते ।



Scanned with CamScanner

तद्यथा -

**उप-समीपे यो वासः जीवात्मपरमात्मनोः ।**
**उपवासः स विज्ञेयो न तु कायस्य शोषणम् ॥ (वराहोपनिषद्)**

अथवा -

**उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैस्सह ।**
**उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ (भविष्यपुराणम्)**

तथा च तस्मादग्रे उपवासनियमेषु प्रोक्तं यत् -

**असकृज्जलपानाञ्च सकृद् ताम्बूलभक्षणात् ।**
**उपवासः प्रणश्येत दिवा स्वापाच्च मैथुनात् ॥ (भविष्यपुराणम्)**

देवीभागवतेप्युक्तं यत् भगवतः शिवस्य ध्यानम् , तज्जपः स्नानम्, तत्कथाश्रवणम् आदिगुणैस्सह वासः अर्थात् क्रियाभिः सह कालयापनमर्थादेतद् उपवासकर्तुः लक्षणम् । व्रतीषु इमे नियमा अनिवार्यत्वेन विद्यमानाः भवेयुः । केवलं अनशनेन उपवासः व्रतं वा न भवति । अनशनेनापि कश्चिद् लाभः तु स्यादेव किन्तु यथेष्टलाभाय विधिपूर्वकाः सर्वाः क्रियाः करणीयाः भवन्ति। व्रतोपवासः एकस्यैव नामद्वयं विद्यते अयमपि एकः मतः । मुमुक्षुः जीवात्मने जागरणमनिवार्यम् यथा गीतायाम् -

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।**
**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ (श्रीमद्भगवद्गीता २-६९)**

विषयासक्तसंसारिणां या रात्रिः तस्यां संयमिनः जाग्रन्ति । आत्मदर्शनविमुखप्राणिगणः यस्यां जगदावस्थायां जाग्रति मनीषी । आत्मादर्शननिरतानां सा निशा विद्यते । अतः तत्सिद्धं यत् विषयासक्ताः निद्रिताः भवन्ति । संयमिनः जाग्रन्ति । संयमी प्रबुद्धः भवति । जीवात्मन आवरणविशेषं दूरं भवति तदेव शिवतत्वं विद्यते । जीवात्मपरमात्मनोः ऐक्यमेव जीवशिवयोः संमेलनं परमं चरमं लक्ष्यं भवति प्रत्येकस्य जीवस्य । योगशास्त्रस्य शब्देषु इन्द्रियाणां प्रत्याहारः चित्तवृतिनिरोधः एवं महाशिवरात्रिव्रतं एकैव पदार्थः । ज्ञानेन्द्रियकर्मेन्द्रियाणां मनसा बुद्ध्या चित्तेन अहङ्कारेण सह समुचितो निरोधः एव वास्तविका यथार्थपूजा शिवस्य विद्यते । ज्ञानभक्तिकर्मभिः तन्निरोधो भवति । गीतायामपि स्पष्टमुक्तं यत् -

**लोकेऽस्मिन द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।**
**ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ (भगवद्गीता -३-३)**



Scanned with CamScanner

शिवपूजा महाशिवरात्रिव्रतं ज्ञानयोगेन भवतु वा भक्तियोगेन भवतु कर्मण: संमिश्रणम् उभयोरनिवार्यम् । शिवरात्रिव्रतेन मुक्ति: करतले स्थिता भवति । शुद्धचेतसा कृतेन महाशिवरात्रिव्रतेन भक्तिसहिता मुक्तिं लभते।

**शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम्।**
**आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ॥(ईशान संहिता)**

समस्तप्राणिभ्य: महाशिवरात्रिव्रतं कल्याणकारकं विद्यते । एकेन व्याधेन महाशिवरात्रिव्रतं विहीतमासीत् तेनानुष्ठानेन शिवेन स्वगणै: तस्मै विमानं प्रेषितमासीत् । शिवलोकं यदा प्राप्तवान् स व्याध: तथा यम: शिवं कथयामास यत्-

**निषादो जीवघाती च सर्वधर्मबहिष्कृत: ।**
**न धर्मोऽप्यर्जितस्तेन निर्गतं यमशासनम् ॥ (स्कन्दपुराणाम्)**

अनशनपूर्वकं शिवरात्रिव्रतेन श्रद्धाभावपूर्वकं कृतेन व्रताचरणेनायं शिवलोकं प्राप्तवानिति शिवेन श्रावितं तदा स यम: शान्त: जात: । महाशिवरात्रिव्रतं कर्तुं आचाण्डालादि सर्वेषामधिकार: वर्त्तते । अनेन व्रतेनाध्यात्मिकाभ्युदयो भवति । वैज्ञानिकदृष्ट्यापि व्रतस्य फलं सर्वर्थैव मिलति तदपि ते स्वीकुर्वन्ति ।भक्ति अहैतुकी भवतु अमायिका भवतु तेन शिवतत्वं शिवलोकं च प्राप्यते तदस्ति व्रतस्याशय: नान्यथा शिवजीवयो: सामान्यभेद: एवास्ति । सर्वं लब्ध्वाऽपि यो स्वल्पं मनुते, असन्तुष्टो च भवति स जीव: , स्वल्पं लब्ध्वापि य: सर्वं लब्धमिति मनुते स शिव: । व्रतेऽस्मिन् मनसा शिवस्मरणमनिवार्यं कारणं प्रत्येकक्षणं जीव: शिवं प्रति गच्छति नाम मृत्युं प्रति गच्छति । स शिव: मृत्युञ्जयोऽस्ति । अत: तस्य स्मरणं प्रकर्तव्यम्। यथा -

**प्रतिश्वासे सविश्वासं शिवं स्मर दिने दिने।**
**पुन: श्वासे न विश्वासं आगमिष्यति वा न वा ॥ (शिवकथाङ्क:)**

प वर्ग मूर्ति: भूत्वापि शिव: अपवर्ग मूर्ति: वर्त्तते । यथा तत्र भवता मल्लिनाथेन प्रोक्तं यत्-
**पिनाक – फणि – बालेन्दु –भस्म – मन्दाकिनीयुता । प वर्ग रचिता मूर्ति अपवर्ग प्रदाऽस्तु व: ॥ (मल्लिनाथटीका)**

इदं शिवरात्रिव्रतं सर्वेषामपवर्गाय भूयात् तदर्थं ब्रह्म वैवर्तपुराणेनापि मतोऽयं पुष्ट: कृतो विद्यते।
**इहैव भारते वर्षे शिवरात्रिं करोति य: । मोदते शिव लोके च सप्तमन्यन्तरावधि ॥**
**शिवाय शिवरात्रौ च बिल्व पत्रं ददाति य: । पत्रप्रयागं च युगं मोदते शिव मन्दिरे॥**



Scanned with CamScanner

स्वयोनिं संप्राप्य शिवभक्तिं लभेद् ध्रुवम्।
विद्यायाम् पुत्रवान् छ्रीमान्प्रजावान्भूमिवान्भवेत्॥
चैत्रमासेऽथवा माघे शङ्करंयोऽर्चयेद्व्रती।करोति नर्तनं भक्त्या नेत्रपाणिर्दिवानिशम्॥
मासं वाऽप्यर्धमासं वा दशसप्तदिनानि वा। दिनमानं युगं सोऽपि शिवलोके महीयते॥
(ब्रह्मवैवर्तपुराण, प्रकृतिखण्ड: २७/७६-८०)

आशुतोषनामाभिधानेन सहजतया परमाप्रीतिर्भवति शिवे –
पुरारौ च मुरारौ च क्व भेद परमार्थिकौ।तथाऽपि मामकी भक्तिः चन्द्रचूडे विलीयते॥

अन्ते महाशिवरात्रिव्रतं जीवे सत्यं सिञ्चितुमस्य जीवस्य शिवं कल्याणं कर्तुमस्माकं शास्त्रै : सहजं सरलं सुन्दरं शुभगं शुभदं व्रतं च प्रक्तं विद्यते। अन्ते च तस्यैव श्लोकस्य सहोदरेण पूर्णं क्रियते ।

डिं डिं डिं कृत डिम्भ डिम्भ डमरौ पाणौ सदा यस्तवै
फुं फुं फुं कृत सर्पजाल हृदये यज्ञेन घण्टारवम्।
भं भं भं कृत भव्यवह्निनयनं कारुण्यमासादयेद्
वं वं वं कृत वै विनाश विलसत् सत्यं शिवंसुन्दरम्॥

शिव: सर्वेभ्य: शङ्करो भूयादिति धिया प्रार्थनया अस्तु शम्।

<u>*सन्दर्भग्रन्था:*</u>


१ – ऋग्वेद: २ – वामनशिवरामाआप्टे (शब्दकोश:)
३ – शिवमहिम्नस्तोत्रम् ४ – यजुर्वेद:
५ – स्कन्दपुराणम् ६ – नृसिंहपरिचर्या
७ – पद्मपुराणम् ८ – अमरकोश:
९ – भविष्यपुराणम् १० – वराहोपनिषद्
११- श्रीमद्भगवद्गीता १२ – ब्रह्मवैवर्तपुराणम्
१३ – पातञ्जलयोगदर्शनम् १४ – ईशान संहिता
१५ – रुद्राष्टाध्यायी १६ – ब्रह्मवैवर्तपुराणम्
१७ – शिवकथाङ्क:



असि.प्रोफेसर( पुराणेतिहास:)
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
सञ्चालित-संस्कृतकोलेज,वेरावलम्




Scanned with CamScanner